# ॥ तुलस्यष्टोत्तरशतनामस्तोत्रम् ॥

.. tulasyaShTottarashatanAmastotram ..

sanskritdocuments.org

August 29, 2017

.. tulasyaShTottarashatanAmastotram ..

# ॥ तुलस्यष्टोत्तरशतनामस्तोत्रम् ॥

## Sanskrit Document Information

Text title : tulasyaShTottarashatanAmastotram

File name : tulasyaShTottarashatanAmastotram.itx

Category : aShTottarashatanAma

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar, PSA Easwaran

Latest update : August 28, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 29, 2017

*sanskritdocuments.org*

# ॥ तुलस्यष्टोत्तरशतनामस्तोत्रम् ॥

तुलसी पावनी पूज्या वृन्दावननिवासिनी ।
ज्ञानदात्री ज्ञानमयी निर्मला सर्वपूजिता ॥ १॥

सती पतिव्रता वृन्दा क्षीराब्धिमथनोद्भवा ।
कृष्णवर्णा रोगहन्त्री त्रिवर्णा सर्वकामदा ॥ २॥

लक्ष्मीसखी नित्यशुद्धा सुदती भूमिपावनी ।
हरिद्रान्नैकनिरता हरिपादकृतालया ॥ ३॥

पवित्ररूपिणी धन्या सुगन्धिन्यमृतोद्भवा ।
सुरूपाऽऽरोग्यदा तुष्टा शक्तित्रितयरूपिणी ॥ ४॥

देवी देवर्षिसंस्तुत्या कान्ता विष्णुमनःप्रिया।
भूतवेतालभीतिघ्नी महापातकनाशिनी ॥ ५॥

मनोरथप्रदा मेधा कान्तिर्विजयदायिनी ।
शङ्खचक्रगदापद्मधारिणी कामरूपिणी ॥ ६॥

अपवर्गप्रदा श्यामा कृशमध्या सुकेशिनी ।
वैकुण्ठवासिनी नन्दा बिम्बोष्ठी कोकिलस्वरा ॥ ७॥

कपिला निम्नगाजन्मभूमिरायुष्यदायिनी ।
वनरूपा दुःखनाशिन्यविकारा चतुर्भुजा ॥ ८॥

गरुत्मद्वाहना शान्ता दान्ता विघ्ननिवारिणी ।
श्रीविष्णुमूलिका पुष्टिस्त्रिवर्गफलदायिनी ॥ ९॥

महाशक्तिर्महामाया लक्ष्मीवाणीसुपूजिता ।
सुमङ्गल्यर्चनप्रीता सौमङ्गल्यविवर्धिनी ॥ १०॥

चातुर्मास्योत्सवाराध्या विष्णु सान्निध्यदायिनी ।
उत्थानद्वादशीपूज्या सर्वदेवप्रपूजिता ॥ ११॥

गोपीरतिप्रदा नित्या निर्गुणा पार्वतीप्रिया ।
अपमृत्युहरा राधाप्रिया मृगविलोचना ॥ १२॥

अम्लाना हंसगमना कमलासनवन्दिता ।

भूलोकवासिनी शुद्धा रामकृष्णादिपूजिता ॥ १३॥

सीतापूज्या राममनःप्रिया नन्दनसंस्थिता ।
सर्वतीर्थमयी मुक्ता लोकसृष्टिविधायिनी ॥ १४॥

प्रातर्दृश्या ग्लानिहन्त्री वैष्णवी सर्वसिद्धिदा ।
नारायणी सन्ततिदा मूलमृद्धारिपावनी ॥ १५॥

अशोकवनिकासंस्था सीताध्याता निराश्रया ।
गोमतीसरयूतीररोपिता कुटिलालका ॥ १६॥

अपात्रभक्ष्यपापघ्नी दानतोयविशुद्धिदा
श्रुतिधारणसुप्रीता शुभा सर्वेष्टदायिनी ॥ १७॥

नाम्नां शतं साष्टकं तत्तुलस्याः सर्वमङ्गलम् ।
सौमङ्गल्यप्रदं प्रातः पठेद्भक्त्या सुभाग्यदम् ।
लक्ष्मीपतिप्रसादेन सर्वविद्याप्रदं नृणाम् ॥ १८॥

इति तुलस्यष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ।

Encoded by Shree Devi Kumar
Proofread by Shree Devi Kumar, PSA Easwaran

---

.. tulasyaShTottarashatanAmastotram ..
Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996
on August 29, 2017

Please send corrections to *sanskrit@cheerful.com*